शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

अलङ्कार निरूपणम्

श्लेषालङ्कारः शब्दालङ्कारोऽर्थालङ्कारो वा ।
इति पूर्वपक्षस्य मत निरूपणम् ।

'श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते' इति 'अनेकार्थैः स्वभावतः = एकोच्चारणेनैव युगपदनेकार्थ बोधकैः पदैः अभिधया अनेकार्थ बोधने सति श्लेषोऽलङ्कारः । स च श्लेषः सभङ्ग, अभङ्ग, उभयात्मकत्वात् त्रिविधः । तत्र 'येन ध्वस्तमनोभवेन' - इत्यादौ सभङ्ग शब्द श्लेषः । 'अंधस्यकारः' इत्यादौ अभङ्ग शब्द श्लेषः । अनयोरेव एकत्र समावेशात् सभङ्गाभङ्गात्मकश्च शब्द श्लेषः । अतः त्रिविध एव श्लेषः शब्दालङ्कारो नार्थालङ्कार इति साहित्य दर्पणकार आचार्य विश्वनाथस्य हृदयम् ।

अत्र अलंकार सर्वस्वकारादयः :-
ननु सभङ्ग एव शब्द श्लेष विषयः । यत्र उदात्तादि स्वर भेदात् भिन्न प्रयत्नोच्चार्यत्वेन भिन्नयोः शब्दयोः जतु काष्ठ न्यायेन श्लेषः । अभङ्गस्तु अर्थश्लेष एव । यत्र स्वरं अभेदादभिन्न प्रयत्नो उच्चार्यतया शब्द अभेदात् अर्थयोः 'एक वृन्त फलद्वय' इति न्यायेन श्लेषः । यो हि यदाश्रितः स तदलङ्कार एव । अलङ्कार्यालङ्कारभावस्य लोकवत् आश्रय आश्रयि भावेन उपपत्तिरिति वदन्ति पूर्वपक्ष मतावलम्बिनः इति ।

उपेन्द्र झा
8/9/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
पुरस्तेला, उड़िसा

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)
साहित्य दर्पणस्य षष्ठ परिच्छेदे
दृश्य काव्ये अङ्क गर्भाङ्कयोर्लक्षण प्रतिपादनम् ।

---

अङ्कः :- अङ्क निरूपण विषये नाट्यशास्त्रे भरत एवमाह '- 'अङ्क इति रूढि शब्दो भावैश्च रसैश्च रोहयत्यर्थान् । नानाविधानयुक्तो यस्मात्तस्माद् भवेदङ्कः' ॥ इति अङ्के नायकस्य नायिकाया वा चरित्रं प्रत्यक्षवद् भासमानं भवति । अयं च रसैर्भावैश्च शोभितः स्पष्टार्थः अदीर्घ समास वाक्य पद्यं युक्तो भवेत् । अत्र व्यापक प्रसङ्गस्यैक ईदृशरूपोऽर्थः समाप्तः स्यात्, किन्तु बिन्दुः यथाकथञ्चित् प्रवृत्त एव भवेत् । अपि चार्थः बहुभिः कार्यैर्युक्तः स्यात् । बीज नामकस्य अर्थ प्रकृतेः निर्वहणावस्थायामिव उपसंहार विधानं तत्र न भवति । किञ्च बहुभिर्दिनैर्वा मासैर्युक्तो नाति प्रचुर पद्यवान् वाक्य पद्यानां तारतम्येन निवेशः । तत्र सन्ध्यावन्दनादि कार्याणां परित्यागो न क्रियते । किञ्च विष्कम्भादिभिरुपादेयैर्वा अन्तरालाद् भाविना कथया सम्प्रयोजितो भवेत् । तत्र त्रिचतुराणां भूमिका पात्राणां नायकः सन्निहितः स्यात् । अत्र देवी परिजन अमात्य वणिक् राजकुमारादीनां प्रत्यक्ष चरित्रैश्च युक्तो भवेत् । अङ्क समाप्तौ च निष्क्रान्त निखिल पात्रः सोऽङ्क इति कीर्तितः । अत्र दूराह्वान वध युद्ध राज्यदेश नगरोपरोधन विवाह भोजनं स्नानानुलेपन रताद्यानां प्रदर्शनं न क्रियते इति ।

गर्भाङ्कः :- प्रधानाङ्क मध्येऽवान्तर विच्छेदरूपोऽङ्को गर्भाङ्क इति कथ्यते । उक्तञ्च साहित्यदर्पणे -

'अङ्कोदर प्रविष्टो यो रङ्गद्वारामुखादिमान् ।
अङ्कोऽपरः स गर्भाङ्कः सबीजः फलवानपि' ॥

अर्थात् कस्यचित् प्रधानाङ्कस्य मध्ये यत्र मङ्गलाचरण प्रस्तावनादि युक्तः सभा पूजा विष्कम्भक प्रवेशकादि युक्तश्च योऽपरोऽङ्कः स गर्भाङ्क इति कथ्यते । यथा बालरामायणे रावणं प्रति कोहलः (कञ्चुकी) —

'श्रवणैः पेयमनेकैर्दृश्यं दीर्घैश्च लोचनैर्बहुभिः ।
भवदर्थमिव निबद्धं नाट्यं सीतास्वयंवरणम्' ॥

इत्यादिना विरचितः सीतास्वयंवरो नाम गर्भाङ्कः ॥

इतिदिक् ।

उपेन्द्र झा
8/9/20
एसो० प्रो० साहित्य
रा० उ० सं० महा०
पुरवैला, भदैयाँ

शास्त्री प्रथम खण्डस्य कृते (साहित्य)

अभिज्ञान शाकुन्तलम् नाम नाटकस्य
चतुर्थाङ्कस्य श्लोक व्याख्या ।

---

'विचिन्तयन्ती यमनन्यमानसा
तपोनिधिं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव ॥'

श्लोकोऽयं 'पुराकवीनां गणना प्रसङ्गे कनिष्ठिकाधिष्ठित कालिदासः' इत्युक्ति दिशा कविकुलमण्डलमण्डनायमानेन, अप्रतिमप्रतिभा सम्पन्नेन कविता वनिताविलासेन महाकविना कालिदासेन विरचितस्य निखिल नाट्यतत्त्वपूतस्य, काव्यकला समन्वितस्य, सर्वथा नवनवाय नाट्यसाहित्य शिरोरत्नभूतस्य संस्कृत साहित्य नवनीत स्वरूपात् चतुर् अभिज्ञान शाकुन्तलम् नाम नाटकात् चतुर्थाङ्काद् गृहीतोऽस्ति ।

श्लोकेऽस्मिन गान्धर्वेण विवाह विधिना शकुन्तलामुद्वाह्य स्व नगरं गते राजनि तच्चिन्ता परायणायां शकुन्तलायां पुष्प-चयनार्थं गतवत्योः सख्योः कदाचित् तत्रागतो सुलभ कोपो महर्षि दुर्वासा । शकुन्तला तदागमनं न ज्ञातवतीति आतिथ्यं नैव चकार । आत्म-परिभवं ज्ञात्वा दुर्वासा तां शशाप —

तपोनिधिं अनन्यमानसा यं विचिन्तयन्ती उपस्थितं माम् न वेत्सि बोधितः सन् अपि प्रथमकृतां कथां प्रमत्तः इव त्वां न स्मरिष्यति ।

अनन्यमानसा = एकाग्रचित्तेन यं = प्रियं विचिन्तयन्ती = विचारयन्ती उपस्थितम् = अत्रागतं तपोनिधिं = तपोधनं माम् न = नहि वेत्सि = जानासि सः = तव प्रियः बोधितः = परैः ज्ञापितः सन् अपि प्रथमं = पूर्वं कृताम् = कथितां कथां = वार्तां प्रमत्तः = मत्तः जन इव = यथा त्वां = शकुन्तलां न = नहि स्मरिष्यति = स्मरणं करिष्यति, पत्नीत्वेन नो स्वीकरिष्यतीति भावः ।

अत्रोपमाऽलङ्कारः । उत्तरार्द्धं प्रति पूर्वार्द्धस्य हेतुत्वात् काव्यलिङ्गम् – 'हेतोर्वाक्य पदार्थत्वे काव्यलिङ्गं निगद्यते' इति लक्षणात् । ~~वसन्ततिलका~~ वसन्ततिलका वृत्तम् – 'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ।

उपेन्द्र झा
8/7/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
[illegible], पूर्णियाँ